दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लदशमी
बैशाख 13 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-184 | 1 | अप्रैल 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशे 'टाइप-1' मधुमेह-रोगिभ्यः महदाश्रयः, निःशुल्क-इन्सुलिन-पम्प-यन्त्रेण परिवर्तयिष्यति जीवनम्

3 क्रीडानां संवर्धनाय मन्त्री यादवेन्द्रगोमावर्येण 'विशेष-पुटकम्' इति धनराशिः याचिता, मनसुख-माण्डवीयवर्येण सह कृतं मेलनम्

4 इरान्-देशस्य विदेश मन्त्री अब्बास अराघची महत्त्वपूर्ण-चर्चायै इस्लामाबादे सम्प्राप्तवान्

## राज्यसभायां राजनैतिक-समीकरणस्य परिवर्तनम्

आम-आदमी-पक्षस्य सप्त सांसदाः राघवचड्ढस्य नेतृत्वे भारतीय-जनता-पक्षे (भाजपा) सम्मिलिताः। अनेन उच्चसदने भाजपा-पक्षस्य शक्तिः वर्धिता, आप-पक्षस्य च प्रभावः क्षीणः जातः।

### नीति-आयोगस्य पुनर्गठनम्; अशोककुमारलाहिड़ी उपाध्यक्षपदे नियुक्तः

केन्द्रसर्वकारेण नीति-आयोगस्य पुनर्गठनं कृतम्। प्रधानमन्त्रिणा डॉ. अशोककुमारलाहिड़ी महोदयः उपाध्यक्षत्वेन नियुक्तः। सः प्रसिद्धः अर्थशास्त्री वर्तते।

### कोणार्क-सूर्यमन्दिरे संरक्षणकार्यस्य आरम्भः

भारतीय-पुरातत्त्व-सर्वेक्षण-विभागेन (ASI) कोणार्क-सूर्यमन्दिरस्य सुदृढीकरणाय तस्य अन्तः शताब्दिपूर्वं पूरितायाः सिकतायाः (sand) निष्कासनकार्यं प्रारब्धम्।

### देशे उर्वरक-सुरक्षा सुदृढा वर्तते: केन्द्रसर्वकारः

केन्द्रसर्वकारेण स्पष्टीकृतं यत् भारते उर्वरकाणां (Fertilizers) पर्याप्तः सञ्चयः अस्ति। आगामि-खरीफ-ऋतौ कृषकाणां कृते 'यूरिया' 'डी.ए.पी.' इत्यादीनां कोऽपि अभावः न भविष्यति।

### भारत-अमेरिका व्यापारवार्तायाः प्रगतिः

वाणिज्यिक-सम्बन्धान् सुदृढं कर्तुं भारतीय-प्रतिनिधिमण्डलं वाशिङ्गटन-नगरे अस्ति। द्विपक्षीय-व्यापार-सम्झौताविषये उभयपक्षयोः मध्ये गम्भीरा चर्चा प्रचलति।

### प्रधानमन्त्री अद्य 'मन की बात' कार्यक्रमे विचारान् प्रकटयिष्यति

प्रधानमन्त्री नरेन्द्रमोदी श्वः (२६ अप्रैल) आकाशवाणी-माध्यमेन 'मन की बात' कार्यक्रमस्य १०८-तमे शृङ्खलायां देशवासिनः सम्बोधयिष्यति। अयं कार्यक्रमः प्रातः एकादशवादने प्रसारितः भविष्यति।

### देशस्य विभिन्नभागेषु उष्णलहरी (Heatwave) प्रकोपात् सचेतता

भारतीय-मौसम-विभागेन (IMD) देहली-एनसीआर-सहितं उत्तरभारते उष्णलहरी-विषये 'पीतसचेतनोद्घोषिता

## नीति-आयोगः भारतस्य नीति-निर्माण-संरचनायां कश्चन महत्त्वपूर्णः स्तम्भः वर्तते-प्रधानमन्त्री



**नवदेहली।** केन्द्रसर्वकारेण नीति-आयोगस्य पुनर्गठनं कृतम् अस्ति। सुप्रसिद्धः अर्थशास्त्री डॉ. अशोककुमारलाहिड़ी महोदयः आयोगस्य नूतन-उपाध्यक्षत्वेन नियुक्तः। श्रीलाहिड़ी महोदयः वर्तमान-उपाध्यक्षस्य सुमन के. बेरी महोदयस्य स्थानं स्वीकरिष्यति। अनेन सहैव सर्वकारेण अन्यान्य-विद्वांसः अपि आयोगस्य पूर्णकालिक-सदस्यत्वेन नियुक्ताः, येषु राजीवगौबा, प्रो. के.वी. राजू, प्रो. गोबर्धन दास, डा. एम. श्रीनिवास तथा प्रो. अभयकरन्दीकर महोदयाः सम्मिलिताः सन्ति।

**नीति-निर्माणस्य सुदृढः स्तम्भः: प्रधानमन्त्री**

प्रधानमन्त्रिणा नरेन्द्रमोदी महोदयेन सामाजिक-माध्यमेन (Social Media) उक्तं यत् नीति-आयोगः भारतस्य नीति-निर्माण-संरचनायां कश्चन महत्त्वपूर्णः स्तम्भः वर्तते। एषः आयोगः सहकारी-सङ्घवादं (Cooperative Federalism) प्रोत्साहयति, सुधारान् अग्रे नयति तथा जनजीवनं सुगमं करोति। प्रधानमन्त्रिणा प्रतिपादितं यत् नीति-आयोगः विभिन्नक्षेत्रेषु नवाचारय (Innovation) दीर्घकालिक-रणनीतिक-चिन्तनाय च एकं गतिशील-मञ्चं प्रदाति।

### प्रधानमन्त्रिणा सह मेलनम्

नीति-आयोगस्य नवनियुक्तः उपाध्यक्षः अशोककुमारलाहिड़ी महोदयः नवदेहली-नगरे प्रधानमन्त्रिणा सह शिष्टाचार-भेटं कृतवान्। अस्मिन् मेलने श्रीमोदी महोदयः तस्मै शुभाशयाः प्रकटितवान्। प्रधानमन्त्रिणा उक्तं यत् अर्थशास्त्रे लोकनीतौ च लाहिड़ी महोदयस्य व्यापकः अनुभवः 'विकसित-भारतस्य' संकल्पं पूरयितुं महतीं भूमिकां निर्वक्ष्यति। प्रधानमन्त्री विश्वासं प्रकटितवान् यत् लाहिड़ी महोदयस्य प्रयासैः देशस्य नीति-निर्माणे नवीना ऊर्जा सञ्चारिष्यति। प्रधानमन्त्रिणा नवनियुक्तेभ्यः पूर्णकालिक-सदस्येभ्यः अपि मङ्गलकामनाः प्रदत्ताः।

## डी.आर.डी.ओ. द्वारा 'एडवांस आर्मोर्ड प्लेटफॉर्म' इत्यस्य अनावरणम्-; स्वदेशी-तन्त्रज्ञानेन रक्षाबलं भविष्यति सुदृढम्



अहिल्यानगरम् (महाराष्ट्रम्)। रक्षा-अनुसन्धान-एवं-विकास-सङ्गठनस्य (DRDO) अध्यक्षेण डॉ. समीर वी. कामत महोदयेन महाराष्ट्रस्य अहिल्यानगरे डी.आर.डी.ओ. प्रयोगशालायाः प्राङ्गणे 'एडवांस आर्मोर्ड प्लेटफॉर्म (ट्रेक एण्ड व्हील)' इत्यस्य अनावरणं कृतम्।

**स्वदेशी-आधारितं निर्माणम्**

रक्षा-मन्त्रालयेन जारीकृते एकस्मिन् वक्तव्ये उक्तं यत् एतत् पटलं (तन्त्रम्) रक्षाबलानाम् आपत्कालिक-आवश्यकतानां पूर्तये विकसितं वर्तते। पूर्णतया स्वदेशी-तन्त्रज्ञानेन निर्मितम् एतत् यन्त्रं गतिशीलता (Mobility), मारक-क्षमता (Fire Power) तथा च सुरक्षा (Protection) इत्यादिभिः विशिष्ट-गुणैः युक्तम् अस्ति।

**सहयोगिन्यः संस्थाः**

अस्य अत्याधुनिक-प्लेटफॉर्म-इत्यस्य निर्माणं टाटा एडवांस सिस्टम लिमिटेड तथा भारत फोर्ज लिमिटेड इति द्वयोः प्रतिष्ठानयोः सहयोगेन सम्पन्नम् अभवत्। अनेन निर्माणेन रक्षा-क्षेत्रे भारतस्य 'आत्मनिर्भरता' सुदृढा भविष्यति।

**केन्द्रीयरेलमन्त्री अश्विनी वैष्णवः अद्य बेङ्गलूरुनगरे (बी. ई. एम. एल.) इति आत्मनिर्भर उच्चगति-बुलेट-रेल-निर्माणकेन्द्रस्य आदित्येत्यस्य उद्घाटनम् अकरोत्। आकाशवाण्या दूरदर्शनेन च सह वार्तालापं कुर्वन् सः सूचितवान् यत् प्रथमं प्रोटोटाइप अग्रिमे वर्षे प्रकाशयिष्यते तथा च सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य उत्तरभागे निर्माणम् भविष्यति।**

## सुभाषितम्

**अधर्मेणैधते पूर्वं,**
**ततो भद्राणि पश्यति।**
**ततः सपत्नान् जयति,**
**समूलस्तु विनिष्यति।।**

यदि कोई व्यक्ति धर्म के अनुसार आचरण नहीं करता तो प्रारम्भ में तो एक पेड के समान खूब फलता फूलता है और विजयी हो कर धन संपत्ति भी अर्जित कर लेता है, परन्तु बाद में जिस प्रकार एक पेड़ मूल सहित सूख जाता है वैसे ही गलत साधनों से अर्जित संपत्ति भी प्रारम्भिक पूंजी (मूल धन) सहित नष्ट हो जाती है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## प्रशासनेन उक्तं यत् देशे उर्वरकोपलब्धता दृढतया स्थिरा अस्ति

सर्वकारेण पुनः दृढीकृतं यत् देशे उर्वरक भण्डारः सुदृढः, स्थिरः, सुव्यवस्थितः च अस्ति, सर्वेषां प्रमुखाणां उर्वरकाणाम् उपलब्धता आवश्यकतापेक्षया अधिकमेव अस्ति। रसायन-उर्वरक मन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् सद्यः एव प्रसारिताभियोगाः तथ्यैः समर्थिताः न सन्ति। तेन सूचितं यत् सदैव समाप्तस्य अस्य रबी- सत्रस्य वर्तमानस्य च दत्तांशः राष्ट्रव्यापीरूपेण सुखप्रदं सुसम्बद्धं च आपूर्ति-स्थितिं सूचयति ।

# हिमाचलप्रदेशे 'टाइप-1' मधुमेह-रोगिभ्यः महदाश्रयः, निःशुल्क-इन्सुलिन-पम्प-यन्त्रेण परिवर्तयिष्यति जीवनम्





**हिमसंस्कृतवार्ताः - काङ्गड़ा।**
हिमाचलप्रदेशसर्वकारस्य भारतसर्वकारस्य च संयुक्तप्रयासैः राष्ट्रिय-स्वास्थ्य-मिशनस्य (NHM) अन्तर्गतं 'टाइप-1' मधुमेहेन पीडितानां बालकानां २७ वर्षपर्यन्तानां यूनां च कृते एकं श्लाघनीयं पदं आरब्धम् अस्ति। अस्याः योजनायाः अन्तर्गतं पात्ररोगिभ्यः अत्याधुनिक-इन्सुलिन-पम्प-यन्त्राणि पूर्णतया निःशुल्कं प्रदीयन्ते, येन तेषां जीवनशैल्यां बृहत् परिष्कारस्य आशा अस्ति।इन्सुलिन-पम्प-यन्त्रस्य प्रयोगेण अधुना रोगिभ्यः दिने पुनः पुनः सूचीवेधस्य (Injection) आवश्यकता न भविष्यति। यत्र पूर्वं प्रतिदिनं ४-५ वारं सूचीवेधः करणीयः भवति स्म, अधुना २-३ दिनेषु केवलम् एकवारमेव तस्य आवश्यकता अस्ति। एषा तकनीकी न केवलं वेदनां न्यूनीकरोति, अपितु रोगिभ्यः अधिकं स्वतन्त्रं सहजं च जीवनं यापयितुं साहाय्यं करोति। एतत् आधुनिकं यन्त्रं शरीरे इन्सुलिन-मात्रां सटीकप्रकारेण नियन्त्रयति, येन 'हाइपोग्लाइसीमिया' (शर्करायाः अत्यल्पता) तथा 'हाइपरग्लाइसीमिया' (शर्करायाः सहसा वृद्धिः) सदृशानां समस्यानां सङ्कटं न्यूनं भवति।

**किं भवति इन्सुलिन-पम्प-यन्त्रम्?**
एतत् एकं लघु-चलभाषम् (Mobile phone) इव यन्त्रं भवति, यस्मिन् एका सूक्ष्मा नलिका (Quick set) तथा 'कैनुला' इत्येतत् लग्नं भवति। एतत् शरीरे स्थाप्यते तथा च अस्य 'सॉफ्टवेयर' मध्ये रोगिणः आवश्यकतानुसारं इन्सुलिन-मात्रा निश्चिता (Set) क्रियते, या निरन्तरं शरीरं प्राप्नोति। विपण्यां (Market) अस्य यन्त्रस्य मूल्यं ३ लक्षरूप्यकतः ७ लक्षरूप्यकपर्यन्तं भवति, यदा तु अस्य सम्मार्जने (Maintenance) प्रतिमासं ४-५ सहस्ररूप्यकाणां व्ययः भवति। किन्तु हिमाचलप्रदेशसर्वकारः एतं सर्वं व्ययं स्वयं वहति तथा च पात्ररोगिभ्यः एतां सुविधां निःशुल्कं प्रयच्छति। प्रदेशस्य टाण्डा-चिकित्सा-महाविद्यालये, आईजीएमसी (IGMC) शिमलायां तथा एम्स (AIIMS) बिलासपुरे च सम्प्रति प्रायः ५० रोगिणः अस्याः योजनायाः लाभं प्राप्तवन्तः सन्ति। टाण्डा-चिकित्सा-महाविद्यालयस्य 'एंडोक्रिनोलॉजी एवं मेटाबॉलिज्म' विभागाध्यक्षः डॉ. विनय डोगरा महोदयः अवदत् यत् इन्सुलिन-पम्प-यन्त्रम् एका सुरक्षिता प्रभावशालिनी च तकनीकी अस्ति, या गतेभ्यः बहुभ्यः वर्षेभ्यः प्रयोगे वर्तते। तेन उक्तं यत् एतत् रोगिणां दैनिकचर्यायां किमपि व्याघातं न जनयति तथा च कालेन सह अस्य प्रयोगः अतीव सरलः भवति। एतद् पदं न केवलं रोगिणां स्वास्थ्यं श्रेष्ठं करिष्यति, अपितु तान् आत्मनिर्भरान् आत्मविश्वासिनश्च जीवनं प्रति प्रेरयिष्यति।

# राष्ट्रपति-महोदयायाः आगमनाय हिमाचल-आरक्षकदलं सज्जम्;
## आरक्षक-मुख्यालयेन कृता विस्तृता चर्चा



**हिमसंस्कृतवार्ताः शिमलाः।**
राष्ट्रपति-द्रौपदी मुर्मू महोदयायाः आगामिनी षड्दिवसीय-हिमाचल-भ्रमणं (२७ अप्रैलतः २ मे पर्यन्तम्) सुरक्षितं सुव्यवस्थितं च कर्तुं हिमाचलप्रदेशस्य आरक्षकदलेन उच्चस्तरीयाः सज्जाः आरब्धाः। शिमलायां नियोजित-आरक्षकबलाय आरक्षक-मुख्यालये एका विस्तृता चर्चा आयोजिता, यस्यां 'शून्य-त्रुटि-दृष्टिकोणस्य' (Zero Error Approach) उपरि बलं दत्तम्।शिमला-आरक्षक-अधीक्षकेन तथा दक्षिण-परिक्षेत्रस्य उप-महानिरीक्षकेन संयुक्ततया सर्वान् अधिकारिणः कर्मचारिणः च निर्दिष्टाः। अधिकारिभिः स्पष्टीकृतं यत् एतत् भ्रमणं केवलं सुरक्षाव्यवस्था न, अपितु सम्पूर्णदेशस्य सम्मुखं स्वकीयं व्यावसायिक-कौशलं, अनुशासनं, कार्यक्षमतां च प्रदर्शयितुं सुवर्ण-अवसरः अस्ति।


- समन्वयः संवादश्च: सर्वेषां घटकानां मध्ये निरन्तरं प्रभावी च समन्वयः सुनिश्चितः करणीयः येन कस्यामपि स्थितौ सत्वरं सटीकं च प्रतिवचनं (Response) दातुं शक्येत।
- शून्य-त्रुटि-दृष्टिकोणः: कर्तव्यपालनकाले कापि शिथिलता, प्रमादः वा न सहिष्यते।
- सुरक्षा-प्रोटोकॉल-पालनम्: निर्धारित-सुरक्षा-नियमानां अक्षरशः अनुपालनं प्रत्येकं अधिकारिणा सुनिश्चितं करणीयम्।
- अस्य उच्चस्तरीय-भ्रमणस्य समये हिमाचल-आरक्षकदलस्य कार्यप्रणाली अनुशासनं च देशस्य पुरतः भविष्यति। अतः सर्वे अधिकारिणः 'अग्रतः नेतृत्वं (Leading from the front) कुर्वन्तु, आदर्शम् उदाहरणं च प्रस्तौतु।"

— उप-महानिरीक्षकः, दक्षिण-परिक्षेत्रम्

शिमला-आरक्षक-अधीक्षकेन सर्वे अधिकारिणः निर्दिष्टाः यत् ते स्व-दायित्वानां सूक्ष्मम् अध्ययनं कुर्वन्तु तथा च प्रत्येकं सम्भावित-परिस्थितये पूर्वसज्जां रक्षन्तु।

**भ्रमणस्य विवरणम्:**राष्ट्रपति-द्रौपदी मुर्मू महोदया २७ अप्रैल दिनाङ्के शिमलां प्राप्स्यति। स्वस्य षड्दिवसीय-भ्रमणकाले सा शिमला, पालमपुर, अटल-सुरङ्ग (रोहताङ्ग) तथा लाहौल-स्पीति क्षेत्रेषु गमिष्यति। हिमाचल-आरक्षकदलं राष्ट्रपति-महोदयायाः एतत् भ्रमणं सुरक्षितं, सुव्यवस्थितं, सफलं च कर्तुं पूर्णतया प्रतिबद्धं वर्तते।

# मुख्यमन्त्री सुक्खुः अवदत्—चिकित्सकाः सहयोगं कुर्वन्तु, के.एन.एच. तः 'गायनी' विभागस्य स्थानान्तरणं न्याय्यम्, आई.जी.एम.सी. मध्ये भविष्यति उपचारः



**हिमसंस्कृतवार्ताः - शिमला।**
'के.एन.एच.' (KNH) चिकित्सालयात् " प्रसूति एवं स्त्रीरोग विशेषज्ञ विभागस्य आई.जी.एम.सी. (IGMC) चिकित्सालयं प्रति स्थानान्तरणस्य विरोधं कुर्वते 'मेडिकल टीचर एसोसिएशन' (मेडिकॉट) इत्यस्मै मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः प्रत्युत्तरं दत्तवान्। तेन उक्तं यत् वैद्य-सङ्घेन दत्ता 'प्रतिरोध-प्रदर्शनस्य' (धरना) सचेतना उचिता नास्ति। राज्यसचिवालये मुख्यमन्त्री प्रसारमाध्यमानां प्रश्नानां समाधानं कुर्वन् आसीत्।
मुख्यमन्त्रिणा स्पष्टीकृतं यत् मातृ-शिशु-कल्याणाय (Mother and Child) भारतसर्वकारेण पृथक् चिकित्सालयाः निर्मिताः सन्ति। सर्वकारेण केवलं 'गायनी ओ.पी.डी.' (Gynecology OPD) आई.जी.एम.सी. चिकित्सालयं प्रति प्रेषितम्। अनेन महिलाभ्यः श्रेष्ठतरः उपचारः लप्स्यते। तासाम् 'आधुनिक-रोबोटिक-शल्यक्रियया' चिकित्सा भविष्यति। तेन उक्तं, "के.एन.एच. चिकित्सालये यत् 'अल्ट्रासाउण्ड' यन्त्रं वर्तते, अहं तत् परिवर्तयितुं यत्नं करोमि, यतोहि तत्र किमपि स्पष्टं न दृश्यते।"
अतः अस्य पदक्षेपस्य विरोधः अनुचितः अस्ति। आई.जी.एम.सी. मध्ये महिलाः उत्तमं उपचारं प्राप्स्यन्ति तथा च मातृ-शिशु-चिकित्सालयः (MCH) तत्रैव स्थास्यति। केचन वैद्याः तत्र निश्चितरूपेण नियुक्ताः, ये तत्रैव सेवासु सल्लग्नाः भविष्यन्ति। अन्या व्यवस्था पूर्ववत् चलिष्यति। भाजपा-महिला-मोर्चा इत्यस्य पदयात्रां लक्ष्यीकृत्य पृष्टे प्रश्ने मुख्यमन्त्री अवदत् यत् महिला-आरक्षण-विषये भाजपायाः प्रदर्शनं 'हस्तिदन्त' इव अस्ति—'प्रदर्शनाय अन्यत्, भक्षणाय च अन्यत्'। तेन कथितं यत् महिला-आरक्षण-विधेयकं तु २०२३ वर्षे एव स्वीकृतं जातम्। भाजपायाः एतत् प्रदर्शनं सूचयति यत् सा एतत् प्रवर्तयितुं न इच्छति।

**१५०० कोटिरूप्यकाणां विषये भाजपायाः मौनम्**
मुख्यमन्त्रिणा उक्तं यत् आपदाकाले तथा आर.डी.जी. (RDG) स्थगनकाले भाजपादलेन कोऽपि विरोधः न कृतः। सा १५०० कोटिरूप्यकाणां विषये मौनं धारयति, केवलं जनध्यानं भ्रामयितुं प्रदर्शनं करोति। मल्लिकार्जुन-खड़गे महोदयाय पञ्जीकृतां प्राथमिकीम् (FIR) अधिकृत्य मुख्यमन्त्री अवदत् यत् सः अखिलभारतीय-काङ्ग्रेस-समित्याः अध्यक्षः अस्ति। प्राथमिकीं पञ्जीकृत्य तस्य स्वरं दमनस्य तं भाययितुं च प्रयासः क्रियते।

# संस्कृप्रश्नोत्तरी


1 प्रश्नः भारतस्य उत्तरदिशि कः पर्वतः अस्ति?
उत्तरः भारतस्य उत्तरदिशि हिमालयः पर्वतः अस्ति।
२. प्रश्नः भारतस्य राष्ट्रनदी का अस्ति?
उत्तरः गङ्गा भारतस्य राष्ट्रनदी अस्ति।
३. प्रश्नः भारतस्य दक्षिणदिशि कः सागरः अस्ति?
उत्तरः भारतस्य दक्षिणदिशि हिन्दमहासागरः अस्ति।
४. प्रश्नः क्षेत्रफले भारतस्य विशालतमं राज्यं किम् अस्ति?
उत्तरः क्षेत्रफले राजस्थानराज्यं भारतस्य विशालतमं राज्यं अस्ति।
५. प्रश्नः भारतस्य राजधानी का अस्ति?
उत्तरः नवदेहली भारतस्य राजधानी अस्ति।

# क्रीडानां संवर्धनाय मन्त्री यादवेन्द्रगोमावर्येण 'विशेष-पुटकम्' इति धनराशिः याचिता, मनसुखमाण्डवीयवर्येण सह कृतं मेलनम्



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
श्रीनगरे आयोजितायाः राज्यानां केन्द्रशासितप्रदेशानां च युवाकार्य-क्रीडामन्त्रिणां 'चिन्तन-शिविर-गोष्ठ्याः' अध्यक्षतां केन्द्रीय-युवाकार्य-क्रीडामन्त्री मनसुखमाण्डवीयः अकरोत्। अस्य शिविरस्य माध्यमेन केन्द्रेण राज्यैः च सह उत्तमसमन्वयस्य स्थापना, नवीनयोजनानां प्रभाविरूपेण कार्यान्वयनम् तथा 'फिट् इण्डिया' (Fit India) सदृशानाम् अभियानानां गतिवर्धनस्य दिशि महत्त्वपूर्णाः निर्णयाः स्वीकरिष्यन्ते।अस्मिन् शिविरे हिमाचलप्रदेशस्य प्रतिनिधित्वं कुर्वता क्रीडामन्त्रिणा यादवेन्द्रगोमावर्येण प्रदेशे क्रीडानां संवर्धनाय 'विशेष-स्पोर्ट्स-पुटकम्' (Special Sports Package) इति धनराशेः अभ्यर्थना कृता। तेन केन्द्रीयमन्त्रिणे मनसुखमाण्डवीयवर्येण सह मेलनं कृतं तथा च तस्मै हिमाचली-अङ्गवस्त्रं शिरस्त्राणं च परिधाप्य सम्मानितं कृतम्। अनेन सहैव तेन किन्नौर-लाहौल-स्पीति-धर्मशालासु च 'हाई-एल्टीट्यूड' (High-Altitude) प्रशिक्षणकेन्द्राणां स्थापनायै प्रस्तावः प्रस्थापितः। यादवेन्द्रगोमावर्येण उक्तं यत् हिमाचलप्रदेशस्य भौगोलिकी स्थितिः क्रीडाप्रतिभानां परिष्काराय अतीव अनुकूला अस्ति, किन्तु संसाधनानाम् अभावात् क्रीडकाः उत्तमाः सुविधाः न प्राप्नुवन्ति। तेन केन्द्रसर्वकारः प्रार्थितः यत् हिमाचलस्य कृते एकः 'विशेष-स्पोर्ट्स-पुटकं' दीयेत, येन क्रीडानाम् आधारभूतसंरचना सुदृढा भवितुं शक्नुयात्। अस्मिन् अवसरे तेन राज्ये 'हाई-एल्टीट्यूड' प्रशिक्षणकेन्द्राणां स्थापनायाः विषयः अपि उत्थापितः। गोमावर्येण विशेषरूपेण किन्नौर-लाहौल-स्पीति-धर्मशालासु एतादृशानां प्रशिक्षणकेन्द्राणां उद्घाटनस्य प्रस्तावः दत्तः, येन क्रीडकाः अन्ताराष्ट्रियस्तरीयं प्रशिक्षणं प्राप्तुं शक्नुयुः तथा उच्चक्षेत्रेषु अभ्यासं कृत्वा स्वक्षमतां वर्धयेयुः। तेन कथितं यत् एतेषु क्षेत्रेषु प्रशिक्षणकेन्द्राणां निर्माणेन न केवलं हिमाचलस्य अपितु सम्पूर्णदेशस्य क्रीडकाः लाभान्विताः भविष्यन्ति, भारतं च अन्तर्राष्ट्रिय-क्रीडास्पर्धासु अधिकं सुदृढं भूत्वा उद्भविष्यति।

# सेवानिवृत्त-चतुर्थश्रेणी-कर्मचारिणां शिष्ट-३० प्रतिशतं 'उपदानम्' तथा 'अर्जित-अवकाश-नगदीकरणम्' प्रदानाय आदेशाः




**हिमसंस्कृतवार्ताः - शिमला।**
मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य निर्देशानुसारं राज्यसर्वकारेण १ जनवरी २०१६ तः ३१ जनवरी २०२२ पर्यन्तं सेवानिवृत्तानां अथवा सेवाकाले मृतानां चतुर्थश्रेणी-कर्मचारिणां उपदानम् (ग्रेच्युटी) तथा अर्जित-अवकाश-नगदीकरणम् 'लीव-इनकैशमेण्ट्' इत्येतयोः शिष्टं ३० प्रतिशतं अवशिष्टं धनं (Arrears) तत्कालं प्रदातुं आदेशाः प्रसारिताः।राज्यसर्वकारस्य प्रवक्त्रा अत्र सूचितं यत् सर्वकारेण अस्मिन् अवधौ अन्तिरम-साहाय्यरूपेण (Interim Relief) प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च अंशाः (Instalments) तथा मूल-निवृत्तिवेतने (Basic Pension) मूल-पारिवारिक-निवृत्तिवेतने च महार्घतावृत्तेः (DA) १२ अंशाः पूर्वमेव प्रदत्ताः सन्ति, यासाम् समायोजनं निवृत्तिवेतनस्य/पारिवारिक-निवृत्तिवेतनस्य अवशिष्ट-धनेन सह कर्तुं शक्यते।तेन उक्तं यत् सम्बद्ध-निवृत्तिवेतन-वितरण-प्राधिकारिणं (Pension Disbursing Authorities) निर्दिष्टं यत् एतस्मात् प्रदानात् पश्चात् सेवानिवृत्त-चतुर्थश्रेणी-कर्मचारिणां 'ग्रेच्युटी' तथा 'लीव-इनकैशमेण्ट्' सम्बद्धानां सर्वेषाम् अवशिष्टांशानां पूर्णं भुगतानं सुनिश्चितं भवेत्।


# कोटखाईनगरस्य मीना-बाग-प्रदेशे प्रसिद्धा प्रीति ज़िंटा आगता; बिशू-महोत्सवे बालकानां कृते क्रीडनकानि क्रेतवती



**हिमसंस्कृतवार्ताः- शिमला**
बॉलीवुड- चित्रपट- नटी प्रीति ज़िंटा इदानीं विश्रान्त्यर्थं शिमलानगरस्य कोटखायी-प्रदेशे स्थितवती। सा पंजाब किंग्स -दलस्य सहस्वामिनी अस्ति, आईपीएल-क्रीडाकालस्य व्यस्ततायाः मध्ये मीना-बागे पञ्चदिनानि यावत् अवसत्। अस्मिन् काले सा रत्लाडी-प्रदेशे प्रवर्तमानं बिशू-महोत्सवं द्रष्टुं गतवती, यत्र सा स्वबालकानां कृते क्रीडनकानि क्रेतुं दृष्टा।
चण्डीगढ-नगरे किञ्चित्कालं व्यतीत्य सा हिमाचल-प्रदेशम् आगता, यत्र प्राकृतिक-सौन्दर्ये मध्ये विश्रान्तिं अनुभूतवती। सेब-वृक्षाणां बागैः परिवेष्टितस्य मीना-बागस्य शोभा तस्याः निवासं अधिकं रमणीयं कृतवती। अस्मिन् अवसरे नटी मीना-बागे बुरांश-वृक्षस्य रोपणम् अपि कृतवती। स्वस्य अस्य शान्त-रमणीय-निवासस्य झलकं सा सामाजिक-माध्यमेषु अपि प्रकाशितवती, यत् तस्याः प्रशंसकैः अतीव प्रशंसितम्। प्रीति ज़िंटा मूलतः शिमला-नगरस्य निवासी अस्ति, तस्याः हिमाचल-प्रदेशेन सह विशेषः अनुरागः सर्वदा दृश्यते।




# न्यायालयस्य ऐतिहासिकनिर्णयः हिमाचलप्रदेशसर्वकारस्य २०२४ तमवर्षस्य सेवाधिनियमः निरस्तः



**शिमला (हिमाचलप्रदेशः):** हिमाचलप्रदेशस्य उच्चन्यायालयस्य खण्डपीठेन एकस्मिन् ऐतिहासिके निर्णये 'हिमाचलप्रदेश-सरकारी-कर्मचारी (भर्ती एवं सेवाशर्ताः) अधिनियमः, २०२४' इति पूर्णतः असंवैधानिकं घोषित्वा निरस्तं कृतम्। न्यायमूर्ति विवेकसिंहठाकुरः तथा न्यायमूर्ति रोमेशवर्मा च इत्यनयोः पीठेन अयं महत्त्वपूर्णः आदेशः प्रसारितः।

**किम् अस्ति प्रकरणम्?**
हिमाचलप्रदेशसर्वकारेण एषः अधिनियमः तादृशानां न्यायिकनिर्णयानां प्रभावात् रक्षितुं निर्मितः आसीत्, येषु अनुबन्धकर्मचारिणां पूर्वतनसेवाकालस्य गणनायाः आदेशः दत्तः आसीत्। सर्वकारस्य तर्कः आसीत् यत् एतेषां आदेशानां पालनेन राज्यकोषे अत्यधिकः वित्तीयभारः भविष्यति।

**न्यायालयस्य मुख्याः टिप्पण्यः:**
**१. शक्तीनां पृथक्करणम्:** न्यायालयेन स्पष्टीकृतं यत् विधायिका (Legislature) कानून-माध्यमेन न्यायालयस्य अन्तिमनिर्णयान् प्रभावरहितान् कर्तुं न शक्नोति। एतत् शक्तियों के पृथक्करण (Separation of Powers) इति सिद्धान्तस्य उल्लङ्घनम् अस्ति।
**२. वित्तीयकारणानि अमान्यानि:** न्यायेन उक्तं यत् केवलं धनस्य अभावः कर्मचारिणां वैधानिक-अधिकारान् हन्तुं आधारः न भवितुमर्हति।
**३. आदर्श-नियोक्ता:** न्यायालयस्य मते राज्यसर्वकारः एकः 'आदर्श-नियोक्ता' (Model Employer) भवेत्, न तु कर्मचारिणां शोषणकर्ता।

**अधिनियमस्य प्रभावः:**
अधिनियमस्य निरस्तीकरणेन सह सर्वकारेण अधुना सर्वेभ्यः प्रभावितकर्मचारिभ्यः त्रयाणां मासानां अन्तरे सर्वकारस्य लाभः प्रदेयः भविष्यति। एतेन सहैव, अस्य अधिनियमस्य आधारेण कृताः सर्वाः रिकवरी-आदेशाः अपि समाप्ताः अभवन्।
एषः निर्णयः कर्मचारिणां पक्षे महत्साहाय्यं प्रदास्यति तथा च भविष्ये सर्वकारस्य स्वेच्छाचारितां रोद्धुं साहाय्यकः सिद्धः भविष्यति।

# "महाभाष्यकारस्य पतञ्जलेः परिचयम्"

**योगेन चित्तस्य पदेन वाचां, मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोतं प्रवरं मुनीनां, पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।**

महामुनिः पतञ्जलिविषये उक्तं पद्यमिदं सुप्रसिद्धमस्ति यत् अनेन मुनिना योगशास्त्रे, व्याकरणशास्त्रे, वैद्यकशास्त्रे च ग्रन्थरचना अकुर्वन्। अयं पाणिनीयव्याकरणमाश्रित्य महद्व्याख्यानं लिपिबद्धं चकार, यत् विपश्चितचेतांसि चमत्करोति। नीरसमपि व्याकरणशास्त्रं स्वकीयया अभिनव व्याख्याया सुतरां सरसाञ्चकार। महामुनिना पतञ्जलिना महाभाष्ये सूत्रवार्तिकयोरपूर्तिः [शेषः] परिपूर्तिमानीतेत्यस्माद् हेतोः स पदशेषकारतया संबोधितः। पदशेषकारकात्वात् तदीयमाभिधानं शेषः, नागनाथः, अहिपतिः प्रसिद्धमिति। भगवतः पतञ्जलेः शेषावतारत्वम् इति प्रसिद्धम्। महाभाष्यकारस्य पतञ्जलेः शैली वैदर्भीरीतिरस्ति, यस्याः स्वरुपम् अधोलिखितमस्ति-

**"अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।**
**तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्।"**

इत्थं व्याकरणसदृशो जटिलो नीरसश्च विषयो हृद्यतरेण चूर्णकाख्य गद्येन सरसीकृतो भगवता पतञ्जलिना।

डा. वर्षा प्रकाश टोणगांवकर ®© पुणे/ महाराष्ट्रम्




# संस्कृतं मधुरं सदा- ३२

देशविदेशेषु सर्वत्र संस्कृतस्य व्यापकरूपेण प्रचारः कर्तव्यः इति उद्देश्येन 'हिमसंस्कृतवार्तापत्रिका' सदृश्यः विविधाः संस्कृतवार्तापत्रिकाः, विभिन्नाः संस्कृतगोष्ठ्यः सम्प्रति सक्रियत्वेन कार्यं कुर्वाणाः परिलक्ष्यन्ते। दैनिकी हिमसंस्कृतवार्तेति नामधेया, ई-पत्रिका सञ्चारमाध्यमे सम्प्रति जनप्रियतां गता अस्ति, नात्र सन्देहः। पुनश्च विविधेषु संस्कृतगोष्ठीषु संस्कृतभारतीगोष्ठी अन्यतमा। गोष्ठीयं संस्कृतस्य उज्जीवनाय दृढसङ्कल्पेन, कटिबद्धतया च अहरहः कार्यं कुर्वती अस्ति। एवमेव लोकभाषा- प्रचार- समितिः इति नामधेया संस्कृतगोष्ठी अपि समान्तरालरूपेण संस्कृतस्य सम्प्रसारणं कुर्वती परिलक्ष्यते। विविधेन संस्कृतानुष्ठानेन, गुगलमिट्माध्यमेन च सह मध्ये मध्ये आन्तराष्ट्रिय-सम्मेलनमपि गोष्ठीद्वयेन सम्यग् आचर्यते। एवमेव कर्णाटकराज्ये प्रकाश्यमाना दैनिकी 'सुधर्मा' इति नामधेयायाः वार्तापत्रिकायाः संस्कृतक्षेत्रीयः सहयोगः न सामान्यः। तत्रत्यानि परिशुद्धानि लेखनानानि प्रशंसायोग्यानि एव। एवञ्च केरलतः प्रतिमासं प्रकाश्यमाना 'रसना' इति नामधेया संस्कृतसञ्चिका नितराम् आदर्तव्या वर्तते। एवं विविधेभ्यः क्षेत्रेभ्यः प्रकाश्यमानानि संस्कृतोपकरणानि बहुधा उपलभ्यन्ते, चेदपि विस्तरभयाद् अत्र तानि सर्वाणि न उल्लिख्यन्ते। एवमेव 'संस्कृतसप्ताहः' इति नामधेयम् अभियानमपि संस्कृतप्रसारणोद्देशस्य हि अन्यतमा प्रक्रिया वर्तते। अनेन अभियानेन बहवः संस्कृतानुरागिणः उपकृताः अवलोक्यन्ते। संस्कृतं लोके पुनरुज्जीवनं प्राप्नुयात्, भाषेयं सततं विकासतां गच्छेच्च इत्येव सर्वासां संस्कृतगोष्ठीनां मुख्यलक्ष्यम्।

संस्कृतसप्ताहः पर्वत्वेन सर्वत्र परिपाल्यमानो वर्तते। पाश्चात्यप्रेरितः विकटकालोऽयम् इत्येवं सत्यपि अन्तर्जालीयेषु विभिन्नेषु सामाजिक- माध्यमेष्वपि विविधं संस्कृताभियानं यथाशक्ति प्रवर्तमानमस्ति अधुना। प्रत्येकं श्रावणपूर्णिमातिथौ, यस्यां रक्षाबन्धनयुतायां पुण्यतिथौ प्रतिवर्षं संस्कृतदिवसत्वेन पर्वेदम् आभारतं, विश्वे चैव आचर्यते।

संस्कृतं देवभाषा, अस्मत्पूर्वजानां ऋषिमहर्षीणां भाषा, वेदोपनिषदाम्, पुराणोतिहासकाव्यादीनाम्, समस्तप्राचीनशास्त्राणाञ्च भाषा, अस्माकं संस्कारः, संस्कृतिः, मन्त्रः, कर्म, योगः, ज्ञानम्, भक्तिः, मार्गदर्शनम्, वरदानशक्तिः इत्यादिकं सर्वमपि अत्रैव अन्तर्भूतमस्ति। सनातनधर्मयुतः अस्मत्परिचयः, भारतीयत्वम् इत्यादिकं सर्वमपि अत्रैव विद्यमानमस्ति। अस्माकं सर्वस्वं संस्कृतमेव वर्तते। एतस्य हानिरेव अस्माकं सर्वहानिः। अत एतस्य पुनरुत्थापने, संरक्षणे, विकासकार्ये च अस्माकं प्रत्येकं जनस्य पूर्णं दायित्वं वर्तते, यस्य च दायित्वपालनस्य फलतो भाविसन्ततयोऽपि स्वजीवनमार्गं प्राप्नुयुरित्यत्र नास्ति संशय इति। शुभम्, जयतु संस्कृतम्!

# इरान्-देशस्य विदेश मन्त्री अब्बास अराघची महत्त्वपूर्ण-चर्चायै इस्लामाबादे सम्प्राप्तवान्



इस्राएल्-हिज्बुल्ला-इत्येतयोः मध्ये निरन्तरम् उद्विग्नतायाः मध्ये सम्पूर्ण पश्चिम-एशियादेशे कूटनीतिः तीव्रतरः भवति, यद्यपि दुर्बलः युद्धविरामोपि संकटे एवास्ति । इरान्-देशस्य विदेश मन्त्री अब्बास अराघची महत्त्वपूर्ण-चर्चायै इस्लामाबादे सम्प्राप्तवान् अस्ति, यत्र तेहरान् देशेन उक्तं यत् द्वन्द्वस्य समाप्तेः विषये तस्य स्थितिः प्रत्यक्षतया अमेरिका देशं प्रति नोक्त्वा पाकिस्तानं प्रति प्रेषयिष्यति। इरान्-देशस्य विदेश मन्त्रालयेन स्पष्टं कृतं यत् वाशिङ्गटन्-इत्यनेन सह प्रत्यक्ष-उपवेशनस्य योजना नास्ति। परञ्च अमेरिका-देशेन दृढीकृतम् यत् तस्य विशेषदूतः स्टीव् विट्कॉफ, वरिष्ठोपदेशकः जेरेड कुशनरः च इरानस्य समकक्षैः सह वार्तालापार्थं पाकिस्तानं गच्छतः ।

# संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां चेरनोबिल-परमाणु-दुर्घटनायाः चत्वारिंशत्तमं वर्षं विश्वं आचरति, परमाणु ऊर्जायाः शान्तियुत-उपयोगाय आह्वानम् अभवत्

विश्वं चेर्नोबिल्-विनाशस्य चत्वारिंशत्तमं वर्षम् आचरति अतः संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां परमाणुशस्त्राणां शान्तियुतप्रयोगस्य आह्वानम् अभवत्। ह्यः विशेष-स्मरणीय-सभायां संयुक्तराष्ट्रसङ्घस्य सामान्यसभायाः अध्यक्षा एनालेना बेयरबाक् इत्येषा उक्तवती यत् चेर्नोबिल् इत्यस्य परिमापः स्पष्टः एव अस्ति यत् परमाणु-तन्त्रज्ञानस्य, शान्तिरूपेण उपयोगेनापि, अन्यैः तन्त्रज्ञानैः मूलभूतरूपेण भिन्नः एव अस्ति। षडशीत्यधिक ऊनविंशतिशततमे वर्षे अप्रैल-मासस्य षड्विंशति दिनांके चेर्नोबिल-परमाणु ऊर्जाकेन्द्रस्य इतिहासस्य निकृष्टतमासु परमाणु-दुर्घटनासु अन्यतमा अभवत्, येन सम्पूर्ण यूक्रेन-देशे, बेलारूस्-देशे, यूरोप-देशस्य च अन्येषु भागेषु च रेडियो-एक्टिव्-दूषणस्य प्रसारः अभवत्। बेयरबाकः अवदत् यत् अशीति-लक्षतोप्यधिकाः जनाः विकिरणस्य संस्पर्शे आगताः, सहस्रशः जनाः मृताः, बालकाः ल्युकेमिया इत्यादिभिः रोगैः च पीडिताः अभवन् ।



# पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय च प्रचारः तीव्रः

पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय च प्रचारः तीव्रः अभवत्, यत्र विभिन्नानां राजनैतिकदलानां वरिष्ठनेतारः राज्ये अनेकाः सभाः, पथ प्रदर्शनानि च कुर्वन्ति। भाजपेति दलस्य वरिष्ठाः नेतारः राज्ये प्रचाराभियाने सन्लग्नाः सन्ति। केन्द्रीय गृह मन्त्री अमितशाहः पूर्वी-बर्दवान-हावडा-नगरयोः जनसभां सम्बोधितवान्, तदनन्तरं हावडा-दक्षिण-कोलकाता-नगरयोः पथ प्रदर्शनम् अपि कृतवान् । केन्द्रीय स्वास्थ्य मन्त्री जे. पी. नड्डा पूर्वी-बर्दवान-नदिया-क्षेत्रयोः पथ-प्रदर्शनं कुर्वन् अस्ति, उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः नवद्वीपं प्राप्तवान् अस्ति। तृणमूल काङ्ग्रेस-दलस्य प्रमुखा ममता-बनर्जी हुगली, दम-दम, भवानीपुर, बेहाला इत्येतेषु क्षेत्रेषु प्रचाररताऽस्ति । दलस्य सामान्यसचिवः अभिषेक बनर्जी दक्षिण-24 परगनायां, हावडायां, मानिकतलायां च सभाः करोति। काङ्ग्रेस-दलस्य नेता राहुलगान्धी अपि श्रीरामपुरे, कोलकातानगरस्य शहीद-मिनारे, मेटियाब्रूजे च तिस्रः जनसभाः सम्बोधितवान् । वाममोर्चा अपि प्रचाराभियाने सक्रियः अस्ति, यत्र सी. पी.आई. एम. इत्यस्य दलस्य राज्यसचिवः मोहम्मद सलीमः, वयोवृद्धः नेता असिम दासगुप्तः च हावडायां, पानीहाट्यां, खरदाहे च पथ प्रदर्शनस्य, सभायाः च नेतृत्वं कुर्वन्तौ स्तः।